# सिद्धान्तकौमुदी - ६

## Program in which it is offered: [Integrated Masters – Vyākaraṇa]

**Course Category: [Core]** **Schedule of offering:6**

**Course Credit Structure: [5]**

- **Lecture: [5]**
- **Tutorial: [none]**
- **Practical: [none]**

**Contact Hours per week: [5]**

## 1. Introduction

व्याकरणशास्त्रस्य प्रतिपाद्येषु अंशेषु शब्दसिद्धिप्रक्रिया प्रधानभूता वर्तते । एकस्य शब्दस्य सिद्धौ अष्टाध्याय्याः विभिन्नेभ्यः प्रदेशेभ्यः सूत्राणि आदाय तेषु तेषु प्रसङ्गेषु कार्याणि करणीयानि भवन्ति । सैषा दुर्गमा विविधशब्दसिद्धिप्रक्रिया वैयाकरणप्रवरेण भट्टोजिदीक्षितेन सिद्धान्तकौमुद्याख्ये ग्रन्थे सुगमतया बोधिता । अपि च बहुषु प्रदेशेषु सूत्रवार्तिकभाष्याणां मतेषु भेदे दृश्यमाने यथोचितं सर्वमतानुकूलः अन्यतममतानुकूलो वा पन्थाः अनुसरणीयो भवति यः अल्पमतिभिः ग्रहीतुं न शक्यते । भट्टोजिदीक्षितेन तादृशानि स्थलानि न्यक्षेण परिशील्य सिद्धान्तभूतः अर्थः स्वग्रन्थेऽस्मिन् प्रकाशितः । तस्मात् वैयाकरणप्रक्रियया साधुशब्दस्वरूपस्य निर्णये अयं ग्रन्थः नितरामुपकारकः वरीवर्ति ।

अत्र प्रत्ययान्तधातुप्रकरणानि, नामधातुप्रकरणं, लकारार्थप्रकरणं, पूर्वकृदन्तप्रकरणम् उत्तरकृदन्तप्रकरणम् च अध्याप्यन्ते । तत्र उपकारकाणां व्याख्याभागानामपि यथोचितं बोधनं भविष्यति ।

## 2. Course Objectives

अनेन क्रमेण अध्ययनस्य अन्ते छात्राः –

- अर्थेषु उचितानां लकाराणां प्रयोगे निपुणाः स्युः
- धातूनां कृदन्तरूपाणि निष्पादयितुं समर्थाः भवेयुः
- अनुवृत्त्यादिज्ञानपूर्वकं सूत्रार्थावगमे तद्व्याख्याने च पाटवं प्राप्नुयुः
- प्रकृतग्रन्थभागं प्रतिपङ्क्ति अधीत्य कस्यापि भागस्य व्याख्याने समर्थाः भवेयुः

## 3. Pre-requisites

- प्रकृतग्रन्थभागोपयोगिन्याः अष्टाध्याय्याः धारणा
- इतः पूर्वतनस्य ग्रन्थभागस्य सम्यक् अध्ययनम्
- सन्धिकार्याणां समासानां च ज्ञानम्

## 4. Readings

- सिद्धान्तकौमुदी, मोतिलाल बनरसीदास, भागः – 3 & 4

## 5. Module-wise topics

The suggested structure is as follows:

**Module 1 – णिच्-सन्-यङ्-यङ्लुक्-नामधातु-प्रकरणानि** 20 sessions

**Objectives –**

- णिजन्तानां, सन्नन्तानां, यङन्तानां यङ्लुगन्तानां च दशसु लकारेषु रूपाणि
- एतद्भागान्तर्गतानां सर्वेषां सूत्राणाम् अर्थावबोधः
- ग्रन्थगतानां विषयाणां निरूपणे सामर्थ्यावाप्तिः

**Topics –**

- हेतुमण्णिच्, मुण्डादिभ्यो णिच्
- स्वार्थे सन्, इच्छासन्
- क्रियासमभिहारे यङ् तस्य लुक् च

**Module 2 – नामधातुप्रकरणम्, आत्मनेपदप्रकरणं, परस्मैपदप्रकरणं च भावकर्मतिङ्करणं कर्मकर्तृतिङ्करणं च**

5 sessions

**Objectives –**

- क्यजाद्यन्तानां धातूनां तिङन्तरूपाणि
- धातुभ्यः आत्मनेपद-परस्मैपदनियमाः
- सर्वेषां सूत्राणाम् अर्थावबोधः
- एतद्भागान्तर्गतानां सूत्राणां विवरणे सामर्थ्यम्

**Topics –**

- क्यच्-क्यङ्-क्यष्-काम्यजादयः प्रत्ययाः
- धातुभ्यः आत्मनेपदस्य परस्मैपदस्य च नियमः
- लः कर्मणि च भावे चाकर्मकेभ्यः
- सौकर्यातिशयविवक्षायां कर्मणः कर्तृवद्भावः

**Module 3 – लकारार्थप्रकरणं कृत्यप्रकरणम् च** 10 sessions

**Objectives –**

- लकारार्थानां निष्कर्षपूर्वकं ज्ञानम्
- कृत्यप्रत्ययानां निष्कर्षतो बोधनम्
- प्रकरणान्तर्गतानां सूत्राणामर्थस्य अवबोधः
- एतस्मिन् विभागे विद्यमानां सूत्राणां सुष्ठु व्याख्याने सामर्थ्यम्

**Topics –**

- अभिज्ञावचनादिषु विशिष्टेष्वर्थेषु लकाराः
- तव्यदादयः सामान्यप्रत्ययाः
- यदादयः विशेषप्रत्ययाः
- तव्यदादयः सामान्यप्रत्ययाः
- यदादयः विशेषप्रत्ययाः

**Module 4 – पूर्वकृदन्तप्रकरणम्** 20 sessions

**Objectives –**

- ण्वुलादीनां तृतीयाध्यायद्वितीयपादान्तर्वर्तिनां कृत्प्रत्ययानाम् अवबोधनम्
- एतद्भागान्तर्गतानां सर्वेषां सूत्राणाम् अर्थावबोधः
- ग्रन्थगतानां विषयाणां निरूपणे सामर्थ्यावाप्तिः

**Topics –**

- ण्वुलादयः
- उपपदे विहिताः अणादयः
- तच्छीलादिषु प्रत्ययाः

**Module 5 – उत्तरकृदन्तप्रकरणम्** 20 sessions

**Objectives –**

- तृतीयाध्यायस्य तृतीये चतुर्थे च पादे विहिताः प्रत्ययाः
- एतद्भागान्तर्गतानां सर्वेषां सूत्राणाम् अर्थावबोधः
- ग्रन्थगतानां विषयाणां निरूपणे सामर्थ्यावाप्तिः

**Topics –**

- अव्ययकृतः
- अकर्तरि कारके विहिताः प्रत्यायाः
- स्त्रीप्रत्ययाः

## 6. Pedagogy

अध्यापनपद्धतिः प्रायेण उपन्यासरूपा अभ्यासरूपा च भवति । अयं विषयः प्रक्रियाबहुलः इति कारणतः लेखनफलकस्य अधिकतया उपयोगः करिष्यते । ग्रन्थाध्ययनावसरे अपेक्षितानां भागानां व्याख्यानमपि बोधयिष्यते ।

## 7. Learning Outcome

एतं ग्रन्थभागमधीतवन्तः छात्राः अत्रत्यानां सर्वेषां सूत्राणामर्थं, तल्लाभप्रकारं च सम्यक् ज्ञात्वा तैः लक्ष्यसंस्कारं च कृत्वा साधुरूपनिष्पादनं कर्तुं समर्थाः भविष्यन्ति । सूत्राणामर्थस्य, प्रक्रियायाः ग्रन्थस्थानां शास्त्रीयविचाराणां च मौखिकनिरूपणे समर्थाः भविष्यन्ति ।

## 8. Evaluation Pattern

- कार्यसमर्पणम् २० अङ्काः
- प्रस्तुतिः १५ अङ्काः
- सत्रार्धपरीक्षा २५ अङ्काः
- सत्रान्तपरिक्षा ४० अङ्काः